संस्कृतवर्षस्मृतिग्रन्थमाला-६

प्रधानसम्पादकः

प्रो० वेम्पटि कुटुम्बशास्त्री

# दूरे-तत्तीरे

( 'दूर-उंस पार' नामधेयस्य हिन्दीभाषया लिखितस्य मूल-कविता-संग्रहस्य गीर्वाणवाण्या रूपान्तराऽनुवादः )

संस्कृत-अनुवादकः

**डॉ० श्री त्रिविक्रम पति शर्मा**

राष्ट्रियसंस्कृतसंस्थानम्

मानितविश्वविद्यालयः

नवदेहली

# आमुखम्

अथ विदितचरमेवैतत् समेषां यत् युगाब्द: ५१०१ (१९९९-२०००)-तमो वर्ष: संस्कृतवर्ष: इति भारतशासनेन समुद्घोषित: आसीत्। तदनुसारं भारतशासनेन मानवसंसाधनविकासमन्त्रालयेन, राष्ट्रियसंस्कृतसंस्थानेन अन्याभिश्च विविधाभि: संस्थाभि: राष्ट्रेऽस्मिन् कोणे कोणे बहव: बहुविधाश्च कार्यक्रमा: आयोजिता: अनुष्ठिता आसन्। ऐतिहासिकेन एतेन संस्कृत-वर्षसमुद्घोषणेन संस्कृतज्ञानां संस्कृतप्रेमिणां संस्कृतबन्धूनां सामान्यजनानां च हृदयेषु यथोचितं संस्कृतविषयकं पुनर्जागरणं समुदभूत्। समग्रोऽपि राष्ट्रपरिवार: संस्कृतविषयकै: भावनाप्रचयै: सम्पूरित: समुत्तेजितश्च आसीत्।

ऐतिहासिकीम् आनन्दसन्दोहदां तामिमां संस्कृतवर्षस्मृतिं चिरस्मरणीयां विधातुं संस्कृतवर्षस्मृतिग्रन्थमाला इति नाम्ना त्रिशतस्य ग्रन्थानां प्रकाशन-पर्यवसाना काचित् महत्त्वशालिनी योजना राष्ट्रियसंस्कृतसंस्थानेन स्वीकृता। योजनायामस्याम् अद्य यावत् अप्रकाशितानां शतस्य पाण्डुलिपिग्रन्थानां प्रकाशनम्, विविधासु भाषासु विरचितानां नैकशास्त्रसम्बद्धानाम् अभिनवानां शतस्य ग्रन्थानां संस्कृते अनूद्य प्रकाशनम्, प्रान्तभाषासु प्रसिद्धानां विविध-वाङ्मयप्रक्रियारूपाणां शतस्य ग्रन्थानां संस्कृते अनूद्य प्रकाशनं च सङ्कल्पितं वर्तते। तत्र एतेषु तृतीयं सङ्कल्पं पुरस्कृत्य सञ्जीकृतमेनं ग्रन्थं सहृदयवाचकेभ्य: समर्पयन् परमामोदमनुभवामि।

विद्वत्त्वं कवित्वं प्रशासकत्वं चेति गुणत्रितयेन विभूषिता: अलहाबादविश्वविद्यालयस्य कुलपतय: श्रीमन्त: प्रो० हरिराजसिंहमहोदया: स्वहृदयान्तरालत: समुद्भूतभावनाप्रचयभरिता: हिन्दी-भाषानिबद्धकविता: 'दूर् उस् पार्' इति ग्रन्थे समाकलयन्। मानवजीवनस्य विभिन्नदशां, वास्तविकताम्, आदर्शताम्, अनुभूती: च स्फोरयन्त्य: ता: कविता: एकस्य वैज्ञानिकस्य सिंहमहोदयस्य कलात्मककविताविशेषे विद्यमानं नैपुण्यं निरूपयन्ति। कवितास्ता: आस्वाद्य तन्माधुर्यम् इतरेभ्योऽपि संस्कृतज्ञेभ्य: दित्सन्त: डा० श्री त्रिविक्रमपतिशर्ममहोदया: तदनुवादकरणाय स्वयंस्फूर्तिमलभन्त।

# विषयानुक्रमणिका


शुभ सन्देश *iii*
आमुखम् *v*
समर्प्यतेऽनूदितकाव्यग्रन्थः *vii*
अनुवादकस्य वक्तव्यम् ४
नमनं मे स्वीकुरु २१
दिवसः समागतः २२
अत्यद्भुतः स्वप्नः २३
दिनान्यागमिष्यन्ति यास्यन्ति च २४
यदा ह्योऽस्तंगन्तुमुद्यतो रविः २६
पश्य! पादौ प्रचलतः २७
किं वदिष्यान्म्यहं त्वाम् २८
इयं ममैकाकिता २९
आगमिष्यति दिनकरो नवीनः ३०
कीदृशी रीतिरियम्? ३१
पथि त्वरय मे गतिम् ३२
आयाहि वसन्त! ३३
कथं विस्मरिष्यामि तानि
स्मरणीयानि ३४
आह्वयिष्यामि त्वां कदा? ३६
अये! समागतोऽसौ दिवसः ३७
अवतर ३८
इयमेव सा नगरी-इलाहाबाद ३९
प्रणामोऽयं मे ४०
महाकुम्भः ४१
प्रदत्तं त्वया संबलम् ४३
उदासीनता ४४
कोऽसौ ४५
त्वत्प्रीत्या यत् परिणतफला
ह्यात्मविश्वासशक्तिः ४६
कुरु मूलतो विनष्टान् ४७
के वा ते ४८
मानवः ४९
मित्रताया दीपकः ५०
एकान्ते स्थातव्यं मया ५१
कस्मादपि न भयभीतास्ते ५३
शून्यहस्तता ५४
अतिव्यस्तो मार्गोऽयम् ५५
स्वनिलयाय निमन्त्रणम् ५६
बाष्पयान-शिविका ५७
अलकनन्दा ५९
नाम तथा निवासस्थानं ६१
परिवर्तनम् ६२
गंगादर्शनम् ६३
को वा केनाऽभिज्ञातः ६४
शब्दातीतम् ६५
वद, कस्त्वं ६६
प्रयासः ६७
प्रेमधर्मः ६७
तथा राज्यमेकम् ६८
उपासना ६९
केन प्रदत्तः ७०
सखा ७१
किंभूतं स्याद् गृहं मे ७२
मिलामो वयम् ७३
जीवित आसम् ७३
के वा सन्त्येतादृशाः ७४
मूलभित्ति प्रस्तरम् ७४
सुदूरे तत्तीरे ७५

**स्वापयन्ती दृश्येत**
**तन्मयतया गायन्ती च**
**किमपि लोकगीतम्**
**दोलयन्ती वालदोलिकाम् ।।''** (दृश्यम्)

अनुरागस्य पवित्रतां तथा विशिष्टगुणवत्तामधिकृत्य ललितमधुरभावनायाः समाहारः समुपस्थितः ''मिलामो वयम्'' कवितायाम्—

**''अमूल्यानुरागो भवेन्मानवीयः**
**न हि क्रीणितव्यो धनेनैव एषः**
**न वा शक्यते दातुमस्य स्वमूल्यम्**
**सदा सात्त्विकोऽयं सदा दिव्यदिव्यः**

X X X

**अनेनैव कारुण्यभावो हि जातः**
**अनेनैव मिष्टं भवेन्मातृदुग्धम्**
**अनेनैव पुष्पैर्वनं शोभमानम्**
**नवीनैर्वयं मित्रजातैर्मिलामः ।।''**

कविवराणां हृद्देशे संजायते काचिदवसन्नता संसारस्यास्यानुभूय विपरीतरीतिम्। ''कीदृशी रीतिरियम्'' स्पष्टीकरोत्येवँविधां मनोदशाम् ।

**''शरीरमुज्ज्वलं परं मलिनं तु मनः**
**इहलोकस्य कीदृशी रीतिरियम् ?**
**को वाऽत्र समर्थः समर्पयितुम्**
**शुद्धां प्रीतिं निःस्वार्थपराम् ?**

X X X

**गतानुगतिकपथेनैव चलति यानम्**
**पन्थाः प्राचीनः पथिकस्तु मूर्खः**
**नवपथमनुसृत्य हि प्रचलन्ति**
**कविः सिंहः सुपुत्रश्च केवलम् ।''**

अनेन कथनेन कविदृष्टिरुदारतायाः पूर्णस्वार्थत्यागस्य च पक्षधरा इति विशदीकृतम् ।